PHS3IH

## एकादशः पाठः
# पितरं प्रति पत्रम्

पूर्वमाध्यमिकः अभ्यासशाला
शङ्करनगरं, रायपुरम्
दिनाङ्कः 05–08–2017

पूज्यपितृचरणयोः

सादरं प्रणमामि

अत्र कुशलं तत्रास्तु। भवता प्रेषितं पत्रं मया ह्यः प्राप्तम्। अहं पञ्चशतं रुप्यकाणि कांक्षे अतः धनादेशेन (मनीआर्डर) प्रेषयन्तु।

अहम् अध्ययने मनोयोगेन लीनः अस्मि। मया प्रायः प्रत्येकं पुस्तकं वारमेकं पठितम्। इदानीं पुनरावृत्तिम् आरब्धवान् अस्मि।

अहं आशां करोमि यत् वार्षिक्यां परीक्षायाम् एतस्मिन् वर्षे सर्वप्रथमक्रमाङ्के उत्तीर्णः भविष्यामि। भवदादेशानुसारम् अहं स्वहस्तलेखं संशोधितवान् अस्मि।

भवता अत्र दीपावल्याः अवसरे अवश्यम् आगन्तव्यम्। इति मे प्रार्थना।

भवतां पत्रोत्तरस्य प्रतीक्षारतः।

आज्ञाकारीपुत्रः
वासुदेवः

## शब्दार्थाः

ह्यः = बीता हुआ कल। मया = मेरे द्वारा। पञ्चशतम् = पाँच सौ। कांक्षे = चाहता हूँ। धनादेश = मनीआर्डर। वारमेकम् = एक बार। हस्तलेखम् = लिखावट।

## अभ्यासः

**प्रश्न 1. निम्नलिखित प्रश्नों के उत्तर दीजिए –**

PX1YKJ

(क) वासुदेवः कं प्रति पत्रं लिखति ?

(ख) वासुदेवः कति रुप्यकाणि वाञ्छति ?

(ग) वासुदेवः किं संशोधितवान् ?

(घ) वासुदेवः पत्रमाध्यमेन पितरं कदा आह्वयते ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिए –**

(क) भवता प्रेषितं पत्र मया .............................. प्राप्तम्।

(ख) रुप्यकाणि .................................... प्रेषयन्तु।

(ग) मया प्रत्येकं पुस्तकं .............................. पठितम्।

**प्रश्न 3.**(क) ''अस्मद्'' सर्वनाम के रुप सभी विभक्तियों में चलाइए।

(ख) कृ धातु के रूप लट् व लृट् लकार में चलाइए।

(ग) विद्यालय में प्रधानाचार्य को पत्र लिखने का अभ्यास करेंगे।